स्वर्णिम गुजरात
१९६० -२०१०

# ॥ शोधप्रविधिप्रवेशः ॥



श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम् - गुजरातम्

# ।। शोधप्रविधिप्रवेशः ।।

प्रेरणास्रोतांसि एवं मार्गदर्शकाः
श्रीकुलपतिवर्याः
प्रो. पङ्कज एल. जानीजीमहाभागाः

लेखकः
डॉ. देवेन्द्रनाथ पाण्डेयः

प्रकाशनम्
श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्
जूनागढजनपदम्, गुजरातम् - ३६२ २६६.
दूरभाषः - ०२८७६ - २४४५३२,३३ फेक्स : २४४४१७
www.shreesomnathsanskrituniversity.org

प्रकाशकः -

डॉ. विष्णुः पुरोहितः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्
युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५
जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम् - जनवरी , २०११

मूल्यम् - ४०/-

मुद्रकः -

एच. के ओफसेट, वेरावलम्

# ।। शुभाशंसनम् ।।

विद्यायाः प्रकाशनं बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने-जने करोति। अत एवोक्तम् ''पुस्तकी भवति पण्डितः''। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे 'स्वर्णिमगुजरातजयन्ती'- अवसरे तथा बेङ्गलूरुनगरे आयोजितायां 'विश्वसंस्कृतपुस्तकमेलायां' श्रीसोमनाथसंस्कृतविश्वविद्यालयः बहूनां ग्रन्थानां प्रकाशनं करोति। संशोधनकर्तृणां कृते शोधप्रविधिप्रवेशः नामधेयः ग्रन्थोऽयं महते लाभाय भविष्यति। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

।। जयतु सोमनाथः जयतु संस्कृतम् ।।

*प्रो. पङ्कज एल. जानी*

कुलपतिः

# ॥ प्रस्तावना ॥

समुद्रमन्थनमपि महाप्रयासोऽसीत् संशोधनस्य देवदानवानाम्। आधुनिके कालेऽपि सृष्ट्युत्पत्तिः कथम् अभवत् ? तदर्थं महाभियोगः महाप्रयोगः वा जगतः महावैज्ञानिकाः संमिल्य कृतवन्तः। कस्यापि महाप्रयासस्य महाप्रयोगस्य वा प्रारम्भो जायते मनसि। मनोदृष्टिः आवश्यकी संशोधनाय। एषा दृष्टिः कीदृशी स्यात् ? संशोधनस्य च वैज्ञानिकस्वरूपं कीदृशम् ? अनुसन्धानप्रवृतिः कथं करणीया ? इत्येतत् सर्वं ज्ञातुं शोधप्रवेशः भवतु। भारते बहुषु विश्वविद्यालयेषु बहवः छात्राः संशोधनरताः सन्तः पीएच.डी. तथा एम.फिल्. कुर्वन्तः सन्ति। तस्मात् पूर्वं तेषां शोधप्रवेशः स्यात् इति हेतुना क्रियते किञ्चित् मन्थनमत्र। मन्थनेन प्राप्स्यते नवनीतामृतम् इति आशास्महे वयं। एषा कल्पना सदा सर्वदा विलसति श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्यानां कुलपतिवर्याणां प्रॉ. पङ्कज. एल. जानीजी-महाभागानां हृदये। तेषां महत्या प्रेरणया मार्गदर्शनेन च समभवत् कार्यमिदं तदर्थं तेभ्यः धन्यवादान् ज्ञापयामः। एम. फिल्, पीएच.डी. कुर्वतां छात्राणां कृते पुस्तकमिदं महते लाभाय कल्प्यते।

डॉ. देवेन्द्रनाथः पाण्डेयः
वेदविभागाध्यक्षः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
वेरावलम्

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | अनुसन्धानम् | ०१ |
| २. | अनुसन्धानार्थः | ०२-११ |
| ३. | शोधस्य पर्यायशब्दाः | ११-१५ |
| ४. | शोधस्वरूपम् | १६-२३ |
| ५. | शोधोद्देश्यम् | २३-२९ |
| ६. | शोधाय सामान्यावधानता | २९-३६ |
| ७. | संस्कृतसाहित्येऽनुसन्धानसूत्राणि | ३६-४३ |
| ८. | पादटिप | ४४-५३ |


***

वैज्ञानिक-सिद्धान्तानुसारमूर्जा (Energy) अविनाशशीला[१] भवति। यतो हि प्रकृतिः स्वयं नित्या भवति, प्रकृतेरेव सम्पूर्णो हि संसारः[२] प्रपञ्चरूपः। सर्वेषां पाञ्च-भौतिक-तत्त्वानामूर्जाणाञ्च प्रकृतिरेव स्रोतः। प्रकृतेः नित्यत्वात् तस्याः गर्भप्रसूतोर्जाऽपि नित्यैव भविष्यति। अपरेऽस्मिन् शब्दे प्रकृतिरेव नित्यशक्तिरूपा, तस्या एव विकृतयः संसारस्य सर्वे पदार्थाः तस्मादेतन्मन्यते यत् नित्या सा प्रकृतिः ऊर्जां जनयति स्थज्ञापयति च सर्वेषु चैतन्याऽचैतन्यपदार्थेषु। अत एतत् सुस्थिरं भवति यत् नित्या ऊर्जा परिवर्तिता जायते विकसिता चोपजायते परन्तु त्रैकालिक-विनाशो न भवति तदूर्जायाः। अस्मादेव कारणात् चिकित्साक्षेत्रे, आभियान्त्रिकी-क्षेत्रे सामाजिक -क्षेत्रे तत्तत्समस्यानां समाधानं प्राकृतिक-पदार्थसमवाया देवान्निष्यते शोधार्थिभिः।

अनुसन्धानशब्दार्थोऽपि पूर्वोक्तामेव[३] भावं प्रकप्यति पाठकानाम् समक्षम्। अतः प्राप्तानां प्राकृतिक-प्राकृतिक-पदार्थानां निमयपूर्वक-सेवनाभावात् शरीरे रोगोत्पत्तेः समस्या, अज्ञात-तकनीकि-कारणाच्चाभियान्त्रिकी(Engineering) क्षेत्रे समस्योत्पत्तिः, प्राकृतिक-समाजसंरचना संरक्षण-नियमावहेलनात् अज्ञानाद्वा प्राकृतिक समाजनियमानाम् समाज-प्रबन्धन-क्षेत्रे समस्यासमुद्भावोऽनुभूयते। तथैव साहित्यानुसन्धानक्षेत्र, कलाऽनुसन्धानक्षेत्रे, भाषानुसन्धानक्षेत्रे चाऽपि शोधार्थिभिखगन्तव्यम्। दृष्टश्च विजातीय-वृक्ष-संयोगात्तृतीयप्रकारकवृक्षोद्भवः।

अत एतदायाति यत् अनुसन्धीयते विशेषसाधनैः मूलं स्वरूपं पदार्थस्य, नवीनपदार्थोत्पत्तये, बाह्यागतानां समस्यानां समाधानाय चोपाय प्राप्यते येन माध्यमेन वा तदनुसन्धानमिति भावः। विद्यमानादेव वस्तुनः कश्चिद्विशिष्टोंशः भौतिकजगतः जनसम्प्रदायष्य चोपयोगाय निश्चयीकरणं तस्य मौलिकस्वरूपस्य व्यवहार्यत्वमपि येन माध्यमेन प्रज्ञाकर्तृत्व-भौतिकसाधनेन वा प्रमाणी क्रियते तदव्यनुसन्धानमिति प्रतिपादयितुं शक्यते। अत एव सर्वेषां सांसारिक-पदार्थानां मौलिकं तत्त्वं परमाणु[१] तत्वं निश्चीयते विज्ञानविद्याविशेषज्ञैः, कतिपय दार्शनिकीचायैश्च। अथवा नियतिप्रदत्तया मानवप्रज्ञया यत् कल्पनाप्रसूतं वा कल्पनीयं, असंभवं वस्तुः, तत्सिद्धये भौतिकाभौतिक-साधनोपयोगेन सोद्देश्यमुद्यमः अनुसन्धानमुच्यते।

अनुसन्धानप्रवृत्ति हेतवः -

(१) स्वाभाविक जिज्ञासा[1]

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" - इत्यत्र अपि शब्दबलेन विशेषज्ञानवतां विषयविशेषज्ञानां ग्रहणं भवत्ति। अत एतत् कल्प्यते यत् साधारणोऽपि जनः जीवो वा कंचित्प्रयोजनं हृदये निधायैव कस्मिंश्चित्कर्मणि प्रवर्तते तदा कथं शिक्षितः, विषयविशेषज्ञो वा जनः प्रयोजनं हृदये निधाम कर्मणिनप्रवर्तेत।

अतोऽत्रानुसन्धानप्रवृतौ जिज्ञासाऽपि कारणीभूतां मन्यते। ज्ञातुम् इच्छा जिज्ञासा भवति। जिज्ञासाऽपि कदाचिद् ज्ञानपूर्विका भवति, कदाचित् स्वाभाविकतर्काश्रिता, कदाचिदुभयविहीना, कदाचिद्ज्ञात वस्तुनः गह्वरे स्थितस्यकस्यचिन्मौलिक-तत्त्वावगमनाय, कदाचिदन्यथैव भवति। अतः अनुसन्धान-कर्मणि प्रवृत्तिहेतुरस्ति जिज्ञासा प्रथमं कारणम्। अस्मादेव कारणात् "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्" - इत्युक्तमुपनिषदि।

(२) संभावित-तत्त्वोपलब्धिः

अनुसन्धान-प्रवृत्तौ खलूपब्ध-वस्तुनां मन्थनेन परिशीलनेन तुलनात्मक-गुणधर्माणां परीक्षणेन च संभावितस्य तत्त्वस्यावगमनम्, तस्य सांसारिक-समस्यासमाधानाय चोपयोगः, वा कारणं भवति। कदाचिज्जिज्ञासोपशमनाय कृतमनुसन्धानमपि शोधकर्मणि कारणं भवति। उदाहरणार्थं दार्शनिक-क्षेत्रे, ऋषयः प्रादुर्भूय लोके सर्वान् सांसारिकान् पाञ्चभौतिकपदार्थान् अलूलुकन् ततश्च सर्वान् तान् पदार्थान् सखु-दुःख-मोहमयानन्वभवन्। ऐतषां त्रिविध-सांसारिक-भावानामानुकूल्यं, प्रातिकूल्यं मोहात्मकं चावस्थाञ्च ते निर्धारयामासुः। तेषामपि प्रादुर्भावः प्रकृतेः पाञ्चभौतिक-प्रपञ्चाद्भवतीति अवकलयामासुस्ते। क्रमेण सर्वं मनस्यवधार्य ते विदाञ्चक्रुस्तच्चैतन्यः कश्चित् पुरुषोऽस्य विशालसंसारतरोः प्रवर्तयिताऽस्तीति निश्चयामासुः। तदुपलब्धये चाध्यात्मिक उपायान् शास्त्रोक्तान् चाचिन्तयन्। अग्रे काले-काले साधवोऽपि नानोपासनापद्धतिमवलोक्य तत्तत्त्वं प्रमाणयामासुः। एतत् क्रमिको हि अनुसन्धान-प्रक्रम-विकासः आध्यात्मिक-क्षेत्रे, दार्शनिक-क्षेत्रे च संभावित-तत्त्वोपलब्धिरस्ति।